SUTLEJ-Journal of Literature, Sciences and Development Studies ISSN: 2455-0760
Volume No: 5, Issue No: 1, Year: 2026 (January-June) Peer Reviewed & Refereed Journal (IF: 5.8)
PP: 77-86 Journal Website: www. sutlejgcrjournal.in

# फिट्सूत्रप्रकरणस्य आवश्यकता

**डॉ. सीता चरण झाः**

विभागाध्यक्षः, स्नातकोत्तर-व्याकरण-विभागः,

का.सिं.द.सं. विश्वविद्यालयः, कामेश्वरनगरम्, दरभङ्गा

**सारांशः**

वैयाकरणसिद्धान्तकौमुद्यां चतुष्पादात्मकं फिट्सूत्रप्रकरणं वर्तते। चतुष्पादात्मकस्यास्य फिट्सूत्रस्य रचयिता शन्तनुः शान्तनवो वेति बहुधा निरूपितः समालोचकैः। शान्तनवो वैयाकरणः आसीद्, यो वेदानां स्वरसम्बन्धविचारकः फिट्सूत्राणां रचयिता मन्यते। एतद्विरचितसूत्राणामन्ते 'शान्तनवाचार्यप्रणीतम्' इति स्पष्टो निर्देशः प्राप्तोऽस्ति। फिट्सूत्राणि सप्ताशीति संख्यकानि यानि अन्तोदात्तः, आद्युदात्तः, द्वितीयोदात्तः, पर्यायोदात्तश्चेति चतुर्षु पादेषु विभक्तानि वर्तन्ते। अत्र एतादृशानां विशिष्टनियमानां सङ्ग्रहो विद्यते, यैः शब्दानां नैसर्गिकस्वराणां (उदात्तनुदात्तस्वरितानां) मार्गदर्शनं भवति। प्रातिपदिकानाम् (मूलशब्दानाम्) उदात्तानुदात्तस्वरितस्वराणां निर्धारणाय फिट्सूत्राणि विरचितानि। अष्टाध्याय्यां स्वराणां विधानत्वादपि बहूनां शब्दानां स्वरपरिज्ञानाय फिट्सूत्राणि अतीव उपयोगीनि भवन्ति। अत इमानि फिट्सूत्राणि पाणिनिसम्प्रदायेऽपि उपादेयाङ्गत्वेन स्वीक्रियन्ते। तत्र फिट्सूत्राणामावश्यकत्वं प्रयोजनञ्च वर्तते-

**स्वरनिर्धारणम् –** प्रातिपदिकेषु कुत्र कः स्वरो (उदात्तोऽनुदात्तः स्वरितो वा) भवेदिति प्रतिपादनम्।

**शुद्धत्वम् –** शब्दानां शुद्धोच्चारणमेवञ्च वैदिकलौकिकप्रयोगे स्वरभेदादर्थपरिवर्तनावरोधनम्।

**पाणिनिव्याकरणस्य पूर्त्तिः –** पाणिन्यष्टाध्याय्यां वञ्चितप्रातिपदिकानां स्वरसंविधानपूर्त्तिकरणम्।

**अर्थभेदस्पष्टीकरणम् –** सारूप्यशब्देषु स्वरभेदात् (आद्युदात्तमन्तोदात्तं वा) जायमानमर्थभेदप्रकटीकरणम्।


© Copyright @ Authors

ISSN: 2455-0760
Peer Reviewed & Refereed Journal (IF: 5.8)
Journal Website: www. sutlejgcrjournal.in

यद्यपीदानीं फिट्सूत्रस्याध्ययनं सर्वथा लुप्तप्रायमेव प्रतिभाति, किन्तु शास्त्रीयचिन्तनसन्दर्भे एतादृशानां लुप्तप्रायाणां शास्त्राणां पुनर्जीवनं यथा भवेत्तथा एतादृशः प्रयाशः करणीयः।

**कूटशब्दाः-** अनुच्च, अनुदात्तः, अष्, फिष्, प्रातिपदिकम्, यमन्वन्, शिट्, स्फिग्, हय् इत्यादयः।

**प्रस्तावना**

संस्कृतवाङ्मये ये शब्दाः सन्ति तेषां यौगिकत्वं स्वीकृत्य प्रकृतिप्रत्ययानुशासनेन स्वरपरिज्ञानं क्रियते। तत्र पाणिनिप्रणीतानि स्वरविधायकसूत्राणि- **"अनुदात्तं पदमेकवर्जम्"**[1], **"अनुदात्तस्य य यत्रोदात्तलोपः"**[2], **"चौ"**[3], **"आमन्त्रितस्य च"**[4], **"उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य"**[5], **"एकादेश उदात्तेनोदात्तः"**[6] इत्यादीनि सन्ति।

किन्तु ये केचन शब्दाः अव्युत्पन्नाः रुढाः वा सन्ति, येषां विषये प्रकृतिप्रत्ययाः न विज्ञाताः न वा स्वीकृताः वैयाकरणैः, तेषां शब्दानां स्वरपरिज्ञानाय फिट्सूत्राणामावश्यकता भवति। यद्यपि निरुक्तशास्त्रे सर्वेऽपि शब्दाः यौगिका एव निरूपिताः। तद्यथा- **"सर्वाणि नामानि धातुजानि"**[7] इति। पतञ्जलिनापि- **"नाम च धातुजमाह निरुक्ते- नाम खल्वपि धातुजमेवमाहुर्नैरुक्ताः। व्याकरणे- शकटस्य च तोकम्- वैयाकरणानां च शाकटायन आह धातुजं नामेति"**[8] इति निर्दिष्टम्। अर्थात् निरुक्ते सर्वाणि नामानि धातुजानि भवन्तीत्येव, व्याकरणे शाकटायनोऽपि तानि नामानि धातुजान्येव स्वीकरोति। यदि सर्वाणि नामानि धातुजानि स्युस्तर्हि तत्पक्षे फिट्सूत्राणामावश्यकता भवति। यतोऽहि तत्र प्रकृतिप्रत्ययादिभिरन्यमेव स्वरज्ञानं सुलभं स्यात्, तदर्थं पाणिनिसूत्रमेव पर्याप्तं विद्यते। किन्तु सर्वे वैयाकरणाः **"सर्वाणि नामानि धातुजानि"** न स्वीकुर्वन्ति।

गार्ग्योऽन्ये च वैयाकरणाः विवदमानाः दृश्यन्ते। निरुक्तस्य प्रथमाध्याये एवंविधो विवादः सर्वथा गाम्भीर्य्यं प्राप्नोति। तत्र नैरुक्ताचार्यप्रभृतयः अव्युत्पन्नतया स्वीकृतान्नपि रूढशब्दान् अधातुजान् एव मन्यन्ते। "सर्वाणि नामानि धातुजानि" इति यास्कमतं शाकटायनेनापि स्वीकृतम्। किन्तु वैयाकरणानां मते बहवः शब्दाः अव्युत्पन्नाः एव भवन्ति। तत्र धात्वर्थानुगमो नैव सङ्गच्छते। अतः


© Copyright @ Authors

तेषामव्युत्पन्नानां शब्दानां स्वरपरिज्ञानं तेषां वैयाकरणानां कृते समस्या भवति। यतोऽहि तत्र प्रकृतिप्रत्ययादिविभागोऽसम्भव एव प्रतीयते। अतस्तत्र स्वरविधायकपाणिनिसूत्राणामुपयोगः नैव भवति, येन फिट्सूत्राणामावश्यकतानुभूयते।

रूढशब्दानां विषयेऽपि वैयाकरणेषु केचिदुणादिप्रकरणमाश्रित्य प्रकृतिप्रत्ययज्ञानं मन्यते। पुनस्तत्र रूढशब्दानामपि स्वरपरिज्ञानं तेषां कृते सुलभमेव। किन्तु ये औणादिकप्रकृतिप्रत्ययविभागं सम्यक् न स्वीकुर्वन्ति, ते पुनस्तान् रूढशब्दान्नव्युत्पन्नान् एव मन्वन्ते। तन्मते अखण्डशब्दानां (रूढानां) स्वरज्ञानार्थं शास्त्रस्यावश्यकता भवत्येव, येन प्रकृतिप्रत्ययविभागज्ञानं विनापि स्वरपरिज्ञानं सुलभं स्यात्। यथोक्तम् अव्युत्पत्तिपक्षे- **"लघावन्ते द्वयोश्च बह्वषो गुरुः"**[9] इत्यनेन मध्योदात्तः। नागेशेनापि **"प्रकृतिप्रत्ययविभाग-शून्येष्वेव फिट्सूत्रप्रवृत्तेश्च"**[10] इति लिखितम्। अत्रायम्भावः- यत्र शब्देषु प्रकृतिप्रत्ययविभागो न स्वीकृतः, ते एव अव्युत्पन्नाः शब्दाः फिट्सूत्रविषयाः भवन्तु, फिट्सूत्राणि तत्रैव प्रवर्त्तन्ते। अपाणिनीयान्यपि फिट्सूत्राणि पाणिनीयैराश्रीयन्ते इति भाष्यकारेण निगदितम्।[11] पाणिनिनापि प्रातिपदिकसंज्ञाविधानाय सूत्रद्वयं प्रोक्तम्- **"अर्थवदधातुरप्रत्ययः प्रातिपदिकम्"**[12], **"कृत्तद्धितसमासाश्च"**[13] इति। तत्र प्रथमं सूत्रमव्युत्पन्नशब्दानां प्रातिपदिकसंज्ञाविधानार्थं विद्यते, अपरञ्च यौगिकशब्दानां प्रातिपदिकसंज्ञाविधानार्थम्।

महाभाष्येऽपि फिट्सूत्राणामुद्धरणानि प्राप्यन्ते। तद्यथा- **"किमर्थमिदमुच्यते? आद्युदात्तो यथा स्यात्। अन्तोदात्तो मा भूदिति। नैतदस्ति प्रयोजनम्। यमिच्छत्यन्तोदात्तम्, करोति तत्र चकारमनुबन्धम्। आह च- चितोन्त उदात्तः इति। मध्योदात्तस्तर्हि मा भूदिति"**[14]। अपि च- **"भलोपधातुप्रातिपदिकप्रत्यय-समासान्तोदात्तोदात्तनिवृत्तिस्वरा एकादेशाच्च यणादेशाच्च भवन्ति विप्रतिषेधेन"**[15], **"गोरग्वचनं गवाग्रे स्वरसिद्ध्यर्थम्- गोरग्वक्तव्यः। किं प्रयोजनम्? गवाग्रे स्वरसिद्ध्यर्थम्। गवाग्रे स्वरसिद्धिर्यथा स्यात्"**[16] इति च। एतदतिरिक्तेष्वपि काशिकाप्रदीपोद्योतादिग्रन्थेषु फिट्सूत्राणां निर्देशः प्राप्यते। शान्तनवः प्रत्येकं शब्दप्रकृतेः स्वरं प्रकाशयितुमावश्यकं मन्यते। शान्तनवेन प्रत्येकस्य शब्दस्य प्रकृतिस्वरमवगत्य फिट्सूत्राणि रचितानि। अनेन कार्यमिदं पूर्वमेव कृतमासीत्, तस्मात्पाणिनिना स्वग्रन्थे पुनर्न कृतम्।


© Copyright @ Authors

अतएवायं पाणिनेः पूर्वकालिको मन्यते। परम्पराप्यस्य पाणिनेः स्वतन्त्रा, यस्य वर्णनं पाणिनेः अङ्गभूतपरिशिष्टे प्राप्यते।

येषु शब्देषु धात्वर्थानुगमः प्रतीयते ते यौगिकाः, येषु च विशेषार्थे धात्वर्थानुगमो नियतः स योगरूढः, येषु च शब्देषु धात्वर्थानुगमः नैव प्रतीयते, ते रूढाः अव्युत्पन्नाः वा शब्दाः भवन्ति। मनुष्येषु उत्तरोत्तरं बुद्धिमान्द्यं प्रसज्यते इत्याधुनिकसमालोचकाः मन्यन्ते। अतः शब्देषु धात्वर्थप्रतीतौ न्यूनत्वम् आपतितम्। तेन शब्दाः यौगिकत्वमपहाय योगरूढत्वं तदपहाय च रूढत्वं प्रति प्रवर्त्तन्ते। येन रूढशब्दाना-मुत्तरोत्तरमाधिक्यं समजनि। तदर्थं स्वरविधानाय कस्यापि शास्त्रस्यावश्यकतानुभूता, तदर्थमेव फिट्सूत्राणाम् आविर्भावः सञ्जातः।

तत्र प्रथमतः अव्ययशब्दानां धात्वर्थानुगमो विनष्टः, अतस्ते अव्युत्पन्नाः रूढाः वा स्वीकृताः, परम्परयैव तेषां शब्दानां कुत्रचित् वाचकत्वं कुत्रचिच्च द्योतकत्वं स्वीकृतम्। एवंक्रमेण नामशब्देष्वपि धात्वर्थानुगमस्य रासात्, तत्रार्थवैविध्यमपगतम्, तेन नामशब्दाः यौगिकाः सन्तोऽपि योगरूढाः, ततः परं रूढाः सञ्जाताः। अनेनैवक्रमेण धात्वर्थानुगमस्य सर्वथा रासात्। संस्कृतवाङ्मये रुढशब्दानां संख्या वृद्धि-मुपगता। अस्मिन्नेव सन्दर्भे नामशब्दानां धातुजत्वधातुजत्वविषये शाकटायनो निरुक्तकारश्च नैरुक्ताचार्य-शाकटायनवैयाकरणप्रभृतयः। अतः फिट्सूत्रप्रकरणमेवमेव संक्षिप्तस्वरविधायकं शास्त्रं विद्यते, यत्राव्युत्पन्न-रूढशब्दानां स्वरपरिज्ञानार्थमावश्यकम्।

## फिट्सूत्रस्य प्रणेता

पाणिनीयव्याकरणे फिट्सूत्राणां प्रवक्ता शन्तनुः स्वीकृतः। अतः फिट्सूत्राणि शान्तनवसूत्राणि कथ्यन्ते। शन्तनुना प्रोक्तानि शान्तनवानि, शान्तनवानि च सूत्राणि शान्तनवसूत्राणि। यथोक्तं हरदत्तेन- **"स पुनः शन्तनुप्रणीतः फिषः इत्यादिकम्"**[17] इति। नागेशेनापि हरदत्तमतं समर्थ्यते- **"शन्तनुराचार्यः प्रणीतेति 'द्वारादीनां चे'ति सूत्रे हरदत्तः"**[18] इति।

कीथेनापि 'संस्कृतसाहित्य का इतिहास' इत्यत्र फिट्सूत्रप्रणेतुर्नाम शान्तनव इति लिखितम्। एतेन स्वमतपुष्टये कीलहार्नमतमवलम्बितम्। तत्र **'शान्तनवसूत्राणि'** इति दृष्ट्वा शान्तनव एव फिट्सूत्रस्य प्रवक्तेति ताभ्यामवधारितम्। शन्तनुरयं कः


© Copyright @ Authors

आसीदित्येतद्विषये सम्यक् विचार्य 'संस्कृतव्याकरणशास्त्र का इतिहास' इति ग्रन्थस्य द्वितीये भागे युधिष्ठिरमीमांसकेन कथितं यत्- भीष्मपितामहस्य पिता राजर्षिः शन्तनुरेव फिट्सूत्रप्रवक्ता विद्यते। शन्तनोः वैदुष्यं वायुपुराणे मत्स्यपुराणे च बहुधा वर्णितम्। अतएव स राजर्षिः शन्तनुः फिट्सूत्रप्रवक्ता इति स्वीकरोति युधिष्ठिरमीमांसकः।

**फिट्सूत्राणां रचनाकालः**

फिट्सूत्राणां रचनाकालविषये समालोचकैः बहुविचारितम्। तत्र केचित् पाणिनेरनन्तरं केचिच्च पाणिनेः प्रागिति फिट्सूत्रस्य रचनाकालो मन्यते। युधिष्ठिरमीमांसकेन 'संस्कृतव्याकरणशास्त्र का इतिहास' इति ग्रन्थे फिट्सूत्रप्रवचनकालः पतञ्जलेः प्राक् मन्यते। अर्थात् फिट्सूत्रप्रवक्ता पतञ्जलेः पूर्ववर्त्ती आसीत्। महाभाष्ये अनेकत्र फिट्सूत्राणां कालः पतञ्जलेः पूर्ववर्त्तित्वं निगदितम्। तद्यथा-

**"प्रत्ययस्वरस्यावकाशो- यत्रानुदात्ताः प्रकृतिः। समत्वं सिमत्वम्"**[19] इति। अत्र भाष्यकारः समसिमेत्यनयोः प्रातिपदिकयोः सर्वानुदात्तत्वं निर्दिशति। अत्र समसिमप्रातिपदिकयोः सर्वानुदात्तत्वं **"त्वत्त्वसमसिमेत्यनुच्चानि"**[20] इति फिट्सूत्रेणैव सम्भवति। पाणिनीयस्वरप्रक्रियायां समसिमप्रातिपदिकयोः सर्वानुदात्तत्वविधायकं सूत्रं नैव पठितम्। **"यदि तर्हि पूर्वपदप्रकृतिस्वरत्वं समासान्तोदात्तत्वं बाधते, चप्रियः वाप्रियः अत्रापि बाधेत"**[21] इति। अत्र भाष्यकारः चवाशब्दयोरनुदात्तत्वं सूचयति। चवाशब्दयोरनुदात्तत्वञ्च **"चादयोऽनुदात्ताः"**[22] इति फिट्सूत्रेणैव भवति, एतदर्थं पाणिनिसूत्रं नास्ति। **"प्रातिपदिकस्वरस्यावकाशः- आम्रः शालः"**[23] इति। अत्र भाष्यकारः पतञ्जलिः **"फिषोऽन्त उदात्तः"**[24] इति अन्तोदात्तत्वविधायकं सूत्रं **निर्दिशति। "इदं पुनरस्ति- प्रातिपदिकस्यान्तोदात्तो भवतीति, सोऽसौ लक्षणेनान्तोदात्तः"**[25] इति। अत्र तु स्फुटतया पतञ्जलिः **"फिषोऽन्त उदात्तः"**[26] इति सूत्रमर्थतोऽनुवदति। **"स्वरितकरणसामर्थ्यान्न भविष्यति न्यङ्-स्वरौ स्वरितौ इति"**[27]। अत्र पतञ्जलिः सद्यः **"न्यङ्-स्वरौ स्वरितौ"**[28] इति फिट्सूत्रं निर्दिशति।

अनेन सिद्ध्यति यत् शान्तनवफिट्सूत्राणि पतञ्जलेः पूर्ववर्त्तीनि सन्ति, पाणिनीयैः एतानि फिट्सूत्राणि सादरं निर्दिष्टानि।


© Copyright @ Authors

कात्यायनात् प्राक् फिट्सूत्रप्रवचनकालोऽस्ति। यथाह- **"प्रत्ययस्वरस्यावकाशो यत्रानुदात्ता प्रकृतिः। समत्वं सिमत्वम्"** इति। अत्र समसिमशब्दयोः सर्वानुदात्तत्वं स्वीकृत्य वार्तिककारेण प्रत्ययस्वरस्य सावकाशत्वं निगदितम्। अत्र समसिमशब्दयोः सर्वानुदात्तत्वं फिट्सूत्रेणैव भवतीति पूर्वमेवोक्तम्। एतेन स्फुटं प्रतिभाति यत् वार्तिकप्रवचनकाले कात्यायनः **"त्वत्त्वसमसिमेत्यनुच्चानि"** इति फिट्सूत्रमवश्यं जानाति स्म। अतएव फिट्सूत्राणि वार्तिककारादपि पूर्ववर्तीनि सन्तीति सिद्ध्यति।

फिट्सूत्रकारः पाणिनेरपि पूर्ववर्त्ती इति केषाञ्चिन्मतमस्ति। यद्यपि नागेशः पक्षान्तरमुपस्थापयन् कथयति- **"यद्वा फिट्सूत्राणि पाणिन्यपेक्षया आधुनिककर्तृकाणि"**[29] इति। अर्थात् फिट्सूत्राणि पाणिनेः अर्वाचीनानि सन्ति। किन्तु आचार्यचन्द्रगोमी एतद्विषये एवं निर्दिशति- **"एषः प्रत्याहारः पूर्वव्याकरणेष्वपि स्थित एव। अयं तु विशेषः- ऐऔष् यदासीत् तद् ऐऔच् इति कृतम्। तथाहि- "लघावन्ते द्वयोश्च वह्वषो गुरुः"**[30] इति। **"तृणधान्यानां च द्व्यषाम्"**[31] इत्यत्र पठ्यते- अच् इत्यस्य स्थाने अष् इति प्रत्याहारः पूर्वव्याकरणेषु विद्यमान् आसीत्। एवमनुमीयते यत् ऐऔच् इत्यस्य स्थाने ऐऔष् इति सूत्रमासीत्। ऐऔष् स्थाने एव ऐऔच् इति कृतम्। अतएव **"लघावन्ते द्वयोश्च वह्वषो गुरुः" "तृणधान्यानां च द्व्यषाम्"** इत्यनयोः सूत्रयोः अचः स्थाने अषः निर्देशः उपलभ्येत्। अनेन एवं प्रतीयते यत् पाणिनेः अच्प्रत्याहारस्थाने अष्प्रत्याहारप्रयोक्ता फिट्सूत्रप्रवक्ता पाणिनेः पूर्ववर्त्ती इति।

आपिशलिव्याकरणेऽपि अच्प्रत्याहारः एव पठितः। अनेन सूच्यते यत् अष्प्रत्याहारप्रयोक्ता फिट्सूत्रकारः आपिशलेरपि पूर्ववर्त्ती। यद्यपि युधिष्ठिरमीमांसकः फिट्सूत्रप्रवचनकालं विक्रमात् 3100 वर्षपूर्वमेव निर्दिशति, भीष्मपितामहस्य पितरं शन्तनु एव फिट्सूत्रकारमनुमिनोति च। किन्तु मिथकीयः पौराणिको वा पुरुषः शन्तनुः फिट्सूत्रकारः इति सर्वे न स्वीकुर्वन्ति।

वस्तुतः फिट्सूत्रप्रवचनकालः यास्कादनन्तरं पाणिनेश्च पूर्वं प्रतीयते। तत्र वैदिकनिपातानाम् अव्ययानां वा स्वरविधानार्थं विशिष्टो निर्देशो दृश्यते। यद्यपि पाणिनिनापि वैदिकस्वरार्थं सूत्राणि पठितानि, किन्तु विशेषतो निपातानामव्ययानां वा विषये फिट्सूत्राणि एव समर्थानि प्रतिभान्ति। एवञ्च फिट्सूत्राणि चतुष्पादात्मकानि एव समुपलब्धानि सन्ति। तत्रापि फिषादिसंज्ञाविधानार्थं कोऽपि निर्देशो नास्ति। अतएव एवं प्रतीयते यत् पाणिनेरनन्तरं फिट्सूत्रप्रवक्तुर्ग्रन्थस्य विपुलांशः विस्मृतः


© Copyright @ Authors

ISSN: 2455-0760
Peer Reviewed & Refereed Journal (IF: 5.8)
Journal Website: www. sutlejgcrjournal.in

चतुष्पादात्मक एव अंशोऽवशिष्टः, यं विना निपातादीनां रूढप्रातिपदिकानाञ्च स्वरपरिज्ञानं सर्वथासम्भवमासीत्। अतः फिट्सूत्रप्रवक्तुः पाणिनेः पूर्ववर्त्तीत्वमस्त्येव ।

शान्तनवीय फिट्सूत्रेषु एवंविधाः बहवः पारिभाषिकशब्दाः प्राप्यन्ते, ये पाणिनिव्याकरणे अप्राप्याः सन्ति। यथा- अनुच्च (अनुदात्तः), अष् (अच्), नप् (नपुंसकम्), फिष् (प्रातिपदिकम्), यमन्वन् (वृद्धम्), शिट् (सर्वनाम), स्फिग् (लुप्), हय् (हल्) इति।

**फिट्सूत्रस्य नामकरणम्**

फिट् इति संज्ञा, चतुष्पादात्मकस्य शान्तनवफिट्सूत्रप्रकरणस्य विद्यते। पाणिनीयव्याकरणे अर्थवच्छब्दानां या प्रातिपदिकसंज्ञाभिहिता सैव शान्तनवतन्त्रे फिष्संज्ञा भवति। फिष्शब्दस्यैव फिट् इति प्रथमैकवचने रूपमस्ति। फिष्संज्ञाबलादेव फिट्सूत्रमिति नामकरणम्।

इदानीं चतुष्पादात्मकमेव फिट्सूत्रप्रकरणं समुपलभ्यते। एवं प्रतीयते यत् प्रकरणमिदं कस्यापि बृहत्तन्त्रस्य एकदेशोऽस्ति। यतोऽहि फिष् (फिट्) इत्यादिसंज्ञाविधनार्थं सूत्रं नोपलभ्यते, संज्ञानिर्देशात् प्राक् संज्ञासूत्रस्यावश्यकता भवत्येव। अतः फिष् इति ग्रन्थकारेण संज्ञाविशेषार्थं **"फिषोऽन्त उदात्तः"** इत्यादीनि संज्ञासूत्राणि निबद्धानि। तत्र फिष्, नप्, यमन्वन्, शिट्, स्फिग्, अष्, खय्, हय् इत्यादयः संज्ञाः सन्ति फिट्सूत्रेषु। तत्रापि अष्, खय्, हय् इत्यादयः प्रत्याहारबोधकाः संज्ञाः सन्ति। नागेशेनापि 'हय्' इति हलाम् इति संज्ञा निर्देशः कृतः।

अतएव मन्यते यत् शान्तनवीयतन्त्रं विशालमासीत्। तस्यैव चतुष्पादात्मकफिट्सूत्रप्रकरणस्य अल्पः अंशः इदानीमुपलब्धोऽस्ति, तस्य आदिमं सूत्रं **"फिषोऽन्त उदात्तः"** इत्यस्य फिष् इति गृहीत्वा फिट्सूत्रप्रकरणमिति नामकरणं कृतम्। अर्वाचीनैः कतिपयेषु उल्लेखेषु **"फिषोऽन्त उदात्तः"** इत्यस्य स्थाने **"फिष्"** इत्येव प्रथमं सूत्रं पठितं विद्यते। तेनैव फिट्सूत्रप्रकरणमिति नाम जातम्।

समस्तेषु फिट्सूत्रेषु केवलं पञ्चस्वेव सूत्रेषु वैदिकशब्दानां (छन्दसि) स्वराणां चर्चा कृता विद्यते, शिष्टेषु समेषु सूत्रेषु प्रचलितायां संस्कृतभाषायामेवञ्च वेदे अनयोर्द्वयोः प्राप्तानां संस्कृतशब्दानां स्वराणाम् एवञ्च उच्चारणस्य चर्चा प्राप्यते। अस्मादेव कारणात् फिट्सूत्राणि न केवलं वैदिकव्याकरणस्यैव, अपितु पाणिनीयव्याकरणस्यापि एकं


© Copyright @ Authors

महत्त्वपूर्णमङ्गं मन्यते। पाणिनीयव्याकरणस्य शब्दप्रक्रिया, धातुजशब्दानाम् अध्ययनं, लिङ्गज्ञानं, गणानामध्ययनं, शब्दोच्चारणशास्त्रमित्यादयः प्रमुखविभागाः सन्ति, येषामध्ययनाय अष्टाध्यायी, उणादिसूत्रं, लिङ्गानुशासनं, गणपाठः, शिक्षादिग्रन्थाः रचिताः। स्वरोच्चारणशास्त्राणि शान्तनव कृतानि फिट्सूत्राणि पाणिनीयव्याकरणशास्त्रस्य अस्याः परम्परायाः एको महत्त्वपूर्णो ग्रन्थः प्रतीयते।

**निष्कर्षः**

पाणिनिसम्प्रदाये फिट्सूत्रस्य स्वकीयं महत्त्वं वर्तते। तत्र फिट्सूत्राणि सप्ताशीति वर्तन्ते, यानि चतुर्षु पादेषु विभक्तानि सन्ति- अन्तोदात्तः, आद्युदात्तः, द्वितीयोदात्तः, पर्यायोदात्तश्च।। पाणिनिव्याकरणे **"अर्थवदधातुरप्रत्ययः प्रातिपदकम्" "कृत्तद्धितसमासाश्च"** इत्याभ्यां सूत्राभ्याम् अर्थवतां मूलशब्दानां प्रातिपदिकसंज्ञा विधीयते। सामान्यरीत्या कथयितुं शक्यते यत् सुब्विभक्तियोगात्प्राक् अर्थवतां शब्दानां यन्मूलं स्वरूपं तदेव प्रातिपदिकं भवति। इदमेव प्रातिपदिकं शान्तनवतन्त्रे 'फिट्' इति नाम्ना प्रख्यातम्। अर्थात् 'फिट्'शब्दस्य शाब्दिकोऽर्थो भवति- प्रातिपदिकम्। फिट्सूत्रेषु शब्दानां स्वरसञ्चारोपरि विचारः कृतः। प्रातिपदिकानां नैसर्गिकक्रमेण प्रयुक्तानामुदात्तानुदात्तस्वरितस्वराणां सम्यग्ज्ञानप्रदानाय सूत्राण्येतानि सन्ति। एषां सूत्राणामावश्यकता तु शब्दानामव्युत्पन्नत्वावसरे आयाति। पाणिनीयमतस्य **"अव्युत्पन्नानि प्रातिपदिकानि"** इत्येको बहुचर्चितपक्षो विद्यते। विदुषां मते फिट्सूत्राणां प्रवक्ता आचार्यशन्तनुरस्ति। शन्तनु-प्रणीतत्वादेव एतानि शान्तनवनाम्ना प्रख्यातानि। शन्तनुप्रणीतानि इमानि सूत्राणि पाणिनिसम्प्रदायोऽपि स्वशास्त्रस्य उपादेयमङ्गं स्वीकरोति। यतोहि शान्तनवीय फिट्सूत्रेषु एवंविधाः बहवः पारिभाषिकशब्दाः प्राप्यन्ते, ये पाणिनीयव्याकरणे अप्राप्याः सन्ति। यथा- अनुच्च (अनुदात्तः), अष् (अच्), नप् (नपुंसकम्), फिष् (प्रातिपदिकम्), यमन्वन् (वृद्धम्), शिट् (सर्वनाम), स्फिग् (लुप्), हय् (हल्) इति।

उदात्तानुदात्तादिस्वराः केवलं वैदिकसंहितानाम् उच्चारणशास्त्रार्थमावश्यकाः सन्ति, सामान्यतः संस्कृतभाषोच्चारणाय एषां स्वराणां न काप्यावश्यकता अस्तीति मन्यते। परञ्चैषां स्वराणां संस्कृतभाषायाः उच्चारणायापि नितान्तमावश्यकमस्ति, इति सिद्धान्तः शान्तनवीय फिट्सूत्रैः सर्वप्रथमं प्रस्थापितः, पश्चाच्च पाणिनिव्याकरणेऽप्ययं स्वीकृतः।


© Copyright @ Authors

## सन्दर्भसूची

1. अष्टाध्यायी- 6.1.158
2. अष्टाध्यायी- 6.1.161
3. अष्टाध्यायी- 6.1.222
4. अष्टाध्यायी- 6.1.198, 8.1.19
5. अष्टाध्यायी- 8.2.4
6. अष्टाध्यायी- 8.2.5
7. निरुक्तम्- प्रथमाध्यायः।
8. महाभाष्यम्- "उणादयो बहुलम्" इति सूत्रे।
9. फिट्सूत्रम्- 2.19
10. महाभाष्यम्, उद्योतः- 1.2.45 इति सूत्रे।
11. महाभाष्यम्- "आद्युदात्तश्च" इति सूत्रे।
12. अष्टाध्यायी- 1.2.45
13. अष्टाध्यायी- 1.2.46
14. महाभाष्यम्- "आद्युदात्तश्च" इति सूत्रे।
15. महाभाष्यम्- "उपसर्गाद्दृति धातौ" इति सूत्रे।
16. महाभाष्यम्- "अवङ् स्फोटायनस्य" इति सूत्रे।
17. पदमञ्जरी- "द्वारादीनां च" इति सूत्रे।
18. लघुशब्देन्दुशेखरे- फिट्सूत्रव्याख्यासमाप्तौ।
19. महाभाष्यम्- 6.1.158
20. फिट्सूत्रम्- 4.10
21. महाभाष्यम्- 6.2.1
22. फिट्सूत्रम्- 4.16


© Copyright @ Authors

23. महाभाष्यम्- 6.1.91

24. फिट्सूत्रम्- 1.1

25. महाभाष्यम्- 6.1.123

26. फिट्सूत्रम्- 1.1

27. महाभाष्यम्- 1.2.3

28. फिट्सूत्रम्- 4.6

29. महाभाष्यम्, उद्योतः- 6.1.158 इति सूत्रे।

30. व्याकरणशास्त्र का इतिहास, भाग- 1

31. फिट्सूत्रम्- 2.4


© Copyright @ Authors